अत्रास्ति नदराजोऽयं लौहित्यो ब्रह्मणः सुतः।
अत्रैव दशदिक्पालाः स्वे स्वे पीठे व्यवस्थिताः॥
अत्र स्वयं महादेवो ब्रह्मा चाहश्च सर्व्वदा।
चन्द्रः सूर्य्यश्च सततं वसतेऽत्रैव पुत्रक!॥
सर्व्वं क्रीड़ार्थमायाता रहस्यदेशमुत्तमम्।
अत्र श्रीः सर्व्वतो भद्रा भोग्यमत्र सदा बहु॥
अत्रैव हि स्थितो ब्रह्मा प्राङ्नक्षत्रं ससर्ज्ज ह।
ततः प्राग्ज्योतिषाख्येयं पुरी शक्रपुरीसमा॥
अत्र त्वं वस भद्रन्ते ह्यभिषिक्तो मया स्वयम्।
ततो विदर्भराजस्य पुत्त्रीं मायाह्वयां हरिः।
पुत्त्रार्थे वरयामास नरकस्य स मां शुभे॥"
इति कालिकापुराणे ३७ अध्यायः॥
(इदानीं प्रसिद्धमासामप्रदेशकियदंशकुचविहार)
कामरूपं पुराप्राग्ज्योतिषाख्ययाभिहितम्॥"

प्राग्भारः, पुं, (प्रकृष्टो भारो यत्र।) पर्व्वताग्र-भागः। इति त्रिकाण्डशेषः॥ क्कचित् प्राग्-भाव इति च पाठः॥

प्राग्रहरः, त्रि, (प्राग्रं प्रकृष्टमग्रं क्रियतेऽनेनेति। हृ + अप्।) श्रेष्ठः। इत्यमरः। ३। १। ५८। (यथा, रघौ। १६। २३।
"तथेति तस्याः प्रणयं प्रतीतः
प्रत्यग्रहीत्प्राग्रहरो रघूणाम्।
पूरप्यभिव्यक्तमुखप्रसादा
शरीरबन्धेन तिरोबभूव॥")

प्राग्राटं, क्ली, (प्राग्रे अटतीति। अट् + अच्।) घनदधि। इति त्रिकाण्डशेषः॥

प्राग्र्यं, त्रि, (प्रकर्षेणाग्रे भव इति। प्राग्र + यत्) श्रेष्ठः। इत्यमरः। ३। १। ५८॥ (यथा, महाभारते। ८। ५८। ११।
"कृत्वा हि सुमहत् कर्म्म हत्वा भीष्मसुखान् कुरून्।
जयः प्राप्तो यशःप्राग्र्यं वैरञ्च प्रतियाचितम्॥"

प्राग्वंशः, पुं, (प्राञ्चतीति। प्र + अञ्च + क्किन्प्राक् प्राक् वंशः सपत्नीकयजमानादिसमूहोऽत्र।) हविषां होतव्यानां आधारो यद्गृहं ततः प्राक् पूर्व्वदेशे यजमानसदस्यादिस्थित्यर्थं गृहम् इत्यमरभरतौ॥ (यथा, हरिवंशे। ४१। ७।
"यूपं समितकुशं दर्व्वीचमसोलूखलानि च।
प्राग्वंशं यज्ञभूमिञ्च होतारं चयनञ्च यत्॥"
प्राक्चासौ वंशश्चेति कर्म्मधारयः॥) पूर्व्व-कुलञ्च॥

प्राघातः, पुं, (प्रकृष्ट आघातोऽस्मिन्। यद्वा, प्राह-न्यतेऽस्मिन्निति। प्र + आ + हन् + आधारे घञ्।) युद्धम्। इति हेमचन्द्रः। ३। ४६१॥

प्राघारः, पुं, (प्राघरणमिति। प्र + घृ प्रस्रवणे + घञ्। "उपसर्गस्य घञ्यमनुष्ये बहुलम्।" ६। ३। १२२। इत्युपसर्गस्य दीर्घः।) घृतादि-क्षरणम्। तत्पर्य्यायः। श्चोतः २। इत्यमरः। ३। २। १०॥

प्राघुणः, पुं, (प्राघोणते भ्राम्यतीति। प्र + आ + घुण + कः।) अतिथिः। इति त्रिकाण्डशेषः॥ (कन्प्राघुण + स्वार्थे। प्राघुणकस्तत्रार्थे। यथा, पञ्चतन्त्रे चतुर्थतन्त्रे।
"तदागच्छ प्राघुणकन्यायेनास्मदावासम्॥")

प्राघुणिकः, पुं, (प्राघुण + स्वार्थे ठक्।) अतिथिः। यथा, नैषधे। २। ५६।
"अमितं मधु तत्कथा मम
श्रवणप्राघुणिकीकृता जनैः।
मदनानलबोधनेऽभवत्
खग धाय्या धिगधैर्य्यधारिणः॥"

प्राघूर्णिकः, पुं, (प्र + आ + घूर्ण + भावे घञ्। प्राघूर्णो भ्रमणम्। तत्र साधु इति ठञ्।) अतिथिः। इति हेमचन्द्रः। २। ३३४॥

प्राङ्, त्रि, (प्रकर्षेण अञ्चतीति। प्र + अन्च + "ऋत्विग्दधृक्स्रगिति।" ३। २। ५९। इति क्किन्। "अनिदितां हल उपधायाः क्ङिति।" ६। ४। २४। इति नलोपः। "उगिदचाम्।" इति नुम्। संयोगान्तस्य लोपः। नुमो नका-रस्य। "क्किन् प्रत्ययस्य कुः।" ८। २। ६२। इति कुत्वेन ङकारः।) पूर्व्वदिक्। पूर्व्वदेशः। पूर्व्वकालः। इति मेदिनी चे, ७॥

प्राङ्गः, पुं, (प्रकृष्टमङ्गं यस्य।) पणववाद्यम्। इति शब्दरत्नावली॥

प्राङ्गणं, क्ली, (प्रकृष्टमङ्गनमङ्गं यस्य।) पणव-वाद्यम्। इति शब्दरत्नावली॥ (प्रकर्षेण अङ्गनं गमनं यत्र। णत्वम्।) गृहभूमिः। आङ्गिना इति उठान इति च भाषा। तत्-पर्य्यायः। अजिरम् २ चत्वरम् ३ अङ्गनम् ४। इति हेमचन्द्रः। ४। ७०॥ (यथा, भविष्यो-त्तरे।
"प्रदोषसमये स्त्रीभिः पूज्यो जीमूतवाहनः।
पुष्करिणीं विधायाथ प्राङ्गणे चतुरस्त्रिकाम्॥")
सूर्य्यविद्धस्य तस्य दोषो यथा,—
"अभद्रं सूर्य्यविद्धं प्राङ्गनञ्च तथैव च॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १०३ अः॥

प्राङ्न्यायः, पुं, (प्राक् न्यायः।) चतुर्थोत्तरान्त-र्गतोत्तरविशेषः। यत्राभियुक्त एवं ब्रूयादस्मि-न्नर्थे अनेनाहमभियुक्तस्तु तत्र चार्थं व्यवहार-मार्गेण पराजित इति। उक्तञ्च कात्यायनेन।
"आचारेणावसन्नोऽपि पुनर्लेखयते यदि।
सोऽभिधेयो जितः पूर्व्वं प्राङ्न्यायश्च स उच्यते॥"
इति मिताक्षरा॥

प्राचिका, स्त्री, (प्राञ्चतीति। प्र + अञ्च + ण्वुल्। टापि अत इत्वञ्च।) वनमक्षिका। इत्यमर-भरतौ। ३। ५। ८॥ डाँश इति भाषा॥

प्राची, स्त्री, (प्रथमं अञ्चति सूर्य्यं प्राप्नोतीति। प्र + अञ्च + "ऋत्विग्दधृक्स्रगिति।" ३।२।५९। इत्यादिना क्किन्। "उगितश्च।" ४। १। ६। इति ङीप्। पूर्व्वा दिक् इत्यमरः। १।३।१॥ (यथा, महाभारते। १। ९५। १२।
"जनमेजयः खल्वनन्तां नामोपयेमे माधवीं तस्यामस्य जज्ञे प्राचिन्वान्। यः प्राचीं दिशं जिगाय यावत् सूर्य्योदयात् ततस्तस्य प्राचि-न्वत्वम्॥") पूजकपूज्ययोरग्रम्। यथा,—
"देवाग्रे स्वस्य चाप्यग्रे प्राची प्रोक्ता गुरुक्रमैः॥"
इति।
"यत्रैव भानुस्तु वियत्युदेति
प्राचीति तां वेदविदो वदन्ति।
तथा पुरः पूजकपूज्ययोश्च
सदागमज्ञाः प्रवदन्ति तन्त्रे॥"
इति तिथ्यादितत्त्वम्॥

प्राचीनः, त्रि, (प्रागेवेति। प्राक् + "विभाषाञ्चेर दिक् स्त्रियाम्।" ५। ४। ८ इति खः स्वस्वे-नादेशः।) पूर्व्वदिग्देशकालभवः। तत्पर्य्यायः। प्राक् २। (यथा, आर्य्यासप्तशत्याम्। ३५१।
"प्राचीनाचलमौलेर्यथा शशी गगनमध्यमधि-वसति।
त्वां सखि! पश्यामि तथा छायामिव संकुच-न्मानाम्॥"
यथा च भागवते। ४। २४। १०।
"प्राचीनाग्रैः कुशैरासीदास्तृतं वसुधातलम्॥"
प्रागग्रम्। यथा, ऋग्वेदे। १। १८८। ४।
"प्राचीनं बर्हिरोजसा सहस्रवीरमस्तृणन्॥"
"प्राचीनं प्रागग्रम्।" इति तद्भाष्ये सायनः॥
प्रकृष्टगन्ता। अपराङ्मुखः। यथा, ऋग्वेदे। १। ५४। ५।
"प्राचीनेन मनसा बर्हणावता।"
"प्राचीनेन प्रकर्षेण गन्त्रा अपराङ्मुखेनेत्यर्थः॥"
इति तद्भाष्ये सायनः॥)
पुं, प्राचीरम्। तत्पर्य्यायः आवेष्टकः२ वृतिः३। इति हेमचन्द्रः। ४। ४८॥

प्राचीनपनसः, पुं, (प्राचीनः पनस इति नित्य-कर्म्मधारयः।) विल्वम्। इति त्रिकाण्डशेषः॥

प्राचीनबर्हिः, [स्] पुं, इन्द्रः। इति हेमचन्द्रः। २। ८५॥ (यथा, रघौ। ४। २८॥
"स ययौ प्रथमं प्राचीं तुल्यः प्राचीनबर्हिषा।
अहिताननिलोद्धूतैस्तर्ज्जयन्निव केतुभिः॥")
राजविशेषः। (यथा, महाभारते। १२।२०८।६॥
"अत्रिवंशे समुत्पन्नो ब्रह्मयोनिः सनातनः।
प्राचीनबर्हिर्भगवांस्तस्मात् प्रचेतसो दश॥")
यथा च।
"हविर्द्धानात् षडाग्नेयी पुत्त्रानजनयद्व्रतम्।
प्राचीनबर्हिषं शुक्रं गयं कृष्णं प्रजाजिनौ॥
प्राचीनबर्हिर्भगवान् महानासीत् प्रजापतिः।
हविर्द्धानात् द्विजश्रेष्ठ! येन संवर्द्धिताः प्रजाः॥
प्राचीनाग्राः कुशास्तस्य पृथिव्यां विस्तृता मुने।
प्राचीनबर्हिर्भगवान् ख्यातो भुवि महाबलः॥
समुद्रतनयायान्तु कृतदारो महीपतिः।
महतस्तपसः पारे सुवर्णायां महीपतिः॥
सुषुवे दश पुत्त्रांश्च शर्म्मिणां वै प्रचेतसः।
दशवर्षसहस्राणि समुद्रसलिलेशयाः॥"
इति वह्निपुराणे वरसर्गो नामाध्यायः॥

प्राचीना, स्त्री, (प्राचीन + टाप्।) वनतिक्तिका। इत्यमरः। २।४।८५॥ आकनादि इति भाषा॥ रास्ना। इति शब्दचन्द्रिका॥ (प्राचि भवेति। प्राच् + खः। टाप्।) प्राग्भवा च॥ (पाठा।